# shrI gAyatrIshApavimochanam athavA gAyartrIshApoddhArastotram

# શ્રીગાયત્રીશાપવિમોચનમ્ અથવા ગાયત્રીશાપોદ્ધારસ્તોત્રમ્

## Document Information

Text title : gaayatrii shaapavimochana

File name : shapavimochana.itx

Category : devii, gAyatrI, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravisankar S. Mayavaram msr at comco.com

Proofread by : Ravisankar S. Mayavaram, PSA Easwaran

Latest update : August 23, 2000, February 4, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# shrI gAyatrIshApavimochanam athavA gAyartrIshApoddhArastotram

# શ્રીગાયત્રીશાપવિમોચનમ્ અથવા ગાયર્ત્રીશાપોદ્ધારસ્તોત્રમ્

શાપમુક્તા હિ ગાયત્રી ચતુર્વર્ગફલપ્રદા ।
અશાપમુક્તા ગાયત્રી ચતુર્વર્ગફલાન્તકા ॥

ૐ અસ્ય શ્રીબ્રહ્મશાપવિમોચનમન્ત્રસ્ય નિગ્રહાનુગ્રહકર્તા
પ્રજાપતિરૃષિઃ અથવા બ્રહ્મા ઋષિઃ । કામદુઘા ગાયત્રી છન્દઃ ।
ભુક્તિમુક્તિપ્રદા બ્રહ્મશાપવિમોચની ગાયત્રીશક્તિર્દેવતા ।
બ્રહ્મશાપવિમોચનાર્થે જપે વિનિયોગઃ ॥

ૐ ગાયત્રીં બ્રહ્મેત્યુપાસીત યદ્રૂપં બ્રહ્મવિદો વિદુઃ ।
તાં પશ્યન્તિ ધીરાઃ સુમનસો વાચમગ્રતઃ ।
ૐ વેદાન્તનાથાય વિદ્મહે હિરણ્યગર્ભાય ધીમહી તન્નો બ્રહ્મ પ્રચોદયાત્ ।
ૐ દેવિ ગાયત્રી ત્વં બ્રહ્મ શાપાત્ વિમુક્તા ભવ ॥

ૐ અસ્ય શ્રીવસિષ્ઠશાપવિમોચનમન્ત્રસ્ય
નિગ્રહાનુગ્રહકર્તા વસિષ્ઠઋષિઃ ।
વિશ્વોદ્ભવા ગાયત્રી છન્દઃ ।
વસિષ્ઠાનુગ્રહિતા ગાયત્રીશક્તિ દેવતાઃ ।
વસિષ્ઠ શાપ વિમોચનાર્થં જપે વિનિયોગઃ ॥

તત્ત્વાનિ ચાઙ્ગેષ્વગ્નિચિતો ધિયાંસઃ ધ્યાયતિ વિષ્ણોરાયુધાનિ બિભ્રત્ ।
જનાનતા સા પરમા ચ શશ્વત્ । ગાયત્રીમાસાચ્છુરનુત્તમ ચ ધામ
ૐ ગાયત્રીવસિષ્ઠશાપાદ્વિમુક્તા ભવ ।

ૐ સોઽહમર્કમયં જ્યોતિરાત્મજ્યોતિરહં શિવઃ ।
આત્મજ્યોતિરહં શુક્રઃ સર્વજ્યોતિરસોઽસ્મ્યહમ્ ॥
(ઇતિ યુક્ત્વ યોનિ મુદ્રાં પ્રદર્શ્ય ગાયત્રી ત્રયં પદિત્વ )
( યોનિ મુદ્રા દિખાકર ૩-તીન બાર ગાયત્રી મન્ત્ર કા જાપ કરે ।)

ॐ દેવી ગાયત્રી ત્વં વસિષ્ઠ શાપાત્ વિમુક્તા ભવ ॥

ॐ અસ્ય શ્રીવિશ્વામિત્રશાપવિમોચનમન્ત્રસ્ય
નૂતનસૃષ્ટિકર્તા વિશ્વામિત્રઋષિઃ ।
વાગ્દોહા ગાયત્રી છન્દઃ ।
વિશ્વામિત્રાનુગૃહિતા ગાયત્રી શક્તિઃ સવિતા દેવતા ।
વિશ્વામિત્રશાપવિમોચનાર્થે જપે વિનિયોગઃ ॥

તત્ત્વાનિ ચાઙ્ગેષ્વગ્નિચિતો ધિયાંસસ્ત્રિગર્ભાં યદુદ્ભવાં
દેવાશ્ચોચિરે વિશ્વસૃષ્ટિમ્ । તાં કલ્યાણીમિષ્ટકરીં
પ્રપદ્યે યન્મુખાન્નિઃસૃતો વેદગર્ભઃ ॥

ॐ ગાયત્રિ ત્વં વિશ્વામિત્રશાપાદ્વિમુક્તા ભવ ॥

ॐ ગાયત્રીં ભજામ્યગ્નિમુખીં વિશ્વગર્ભાં યદુદ્ભવાઃ ।
દેવાશ્ચક્રિરે વિશ્વસૃષ્ટિં તાં કલ્યાણીમિષ્ટકરીં પ્રપદ્યે ॥
ॐ દેવી ગાયત્રી ત્વં વિશ્વામિત્ર શાપાત્ વિમુક્તા ભવ ॥

ॐ અસ્ય શ્રીશુક્રશાપવિમોચનમન્ત્રસ્ય શ્રીશુક્ર ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । દેવિ ગાયત્રી દેવતાઃ ।
શુક્ર શાપ વિમોચનાર્થં જપે વિનિયોગઃ ॥

સોઽહમર્કમયં જ્યોતિરર્કજ્યોતિરહં શિવઃ ।
આત્મજ્યોતિરહં શુક્રઃ સર્વજ્યોતિરસોઽસ્મ્યહમ્ ॥

ॐ દેવી ગાયત્રી ત્વં શુક્ર શાપાત્ વિમુક્તા ભવ ॥

પ્રાર્થના ।
ॐ અહો દેવિ મહાદેવિ સન્ધ્યે વિદ્યે સરસ્વતી ।
અજરે અમરે ચૈવ બ્રહ્મયોનિર્નિમોઽસ્તુતે ॥

ॐ દેવી ગાયત્રી ત્વં બ્રહ્મશાપાત્ વિમુક્તા ભવ ।
વસિષ્ઠશાપાત્ વિમુક્તા ભવ ।
વિશ્વામિત્રશાપાત્ વિમુક્તા ભવ ।
શુક્રશાપાત્ વિમુક્તા ભવ ॥

Encoded by Ravisankar S. Mayavaram, Gopal Upadhyay, PSA Easwaran

The sequence and some details differ from print to print.

*shrI gAyatrIshApavimochanam athavA gAyartrIshApoddhArastotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*